IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# न्यायवैशेषिकदर्शने कार्यकारणभावः।

Nimmy K.M
Research Scholar
Dept. of Nyaya, SSUS Kalady

**सारांशः -** भारतीयदर्शने कार्यकारणभावः जगत्क्रमस्य मूलतत्वं मन्यते । कार्यं कारणात् एव उत्पद्यते, अकारणात् किञ्चिदपि न जायते इति सर्वत्र स्वीकृतम् । सांख्यदर्शने सत्कार्यवादः, न्यायदर्शने असत्कार्यवादः, वेदान्तदर्शने कारणकार्ययोः अभेदः प्रतिपाद्यते । एषः दार्शनिकसिद्धान्तानां आधारः, न्यायतर्कस्य मूलं, शास्त्रीयचिन्तनस्य प्रेरकः च भवति । कार्यकारणभावः न्याय- वैशेषिकदर्शने तत्वज्ञानस्य, तर्कप्रणाल्याः, तथा शास्त्रीयचिन्तनस्य आधारभूतः सिद्धान्तः भवति ।

मुख्यशब्दः - समवायिकारणम्, असमवायिकारणम्, निमित्तकारणम्, आन्वीक्षिकी, प्रामाण्यवादः

**न्यायदर्शनम्**

आस्तिकनास्तिकभेदेन दर्शनानां दैविध्यं प्रसिद्धयति । तत्र सांख्य- योग - न्याय - वैशेषिक - पूर्वमीमांसा - उत्तरमीमांसा आस्तिकाः । नास्तिकाः चार्वाकबौद्धजैनाः । युक्तिचिन्तायाः प्रमाणानां च प्राधान्यं कल्पयित्वा गौतममुनिना द्वितीयशतके सूत्ररूपेण रचिता दर्शनपद्धतिः भवति न्यायदर्शनम् । मिथिलायां गौतममहर्षिः जन्माभूत् । न्यायदर्शनं गौतमीविद्या इत्यपि ज्ञायते ।

'प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्मणां शाश्वदान्वीक्षिकी मता ।।'[1] इति

न्यायशास्त्रस्य हेतुशास्त्रम्, हेतुविद्या, प्रमाणशास्त्रम्, तर्कविद्या, वादविद्या, आन्विक्षिकी इत्यादिभिः नामधेयैः प्रसिद्धम् । गौतममहर्षे जीवनकाले इदं दर्शनं 'आन्विक्षिकी विद्या' इति प्रसिद्धमासीत् । अमरसिंहस्य अमरकोशे –

'आन्विक्षिकी दण्डनीतिस्तर्कविद्यर्थशास्त्रयोः' ।
आख्यायिकोपलब्धार्थं पुराणं पञ्चलक्षणम्'[2]। इति ।

अन्वीक्षया प्रवर्तते इत्येव आन्विक्षिकी इति पदस्य व्युत्पत्तिः । आन्वीक्षा अनुमानप्रमाणमेव । दर्शनेन श्रवणेन वा अवगतानि वस्तूनि आधारीकृत्य अनुमानप्रमाणं प्रवर्तते । न्यायः मीमांसा च धर्मशास्त्राणि इति श्रुतिरस्ति ।

'पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।।'[3] इति ।

स्कन्धपुराणं, पद्मपुराणं, न्यायसूत्रवृत्तिः[4] इत्यादिषु ग्रन्थेषु न्यायदर्शनस्य कर्ता गौतममहर्षिः इति व्यक्तं परामृश्यते ।

'कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत् ।
गौतमेन तथा न्यायं सांख्यं तु कपिलेनैव'[5] ।

'प्रमाणैरर्थपरीक्षणं न्यायः'[6] इति वात्स्यायनमतम् । गौतमप्रणीतं न्यायसूत्रम् नामकग्रन्थमेव न्यायदर्शनस्य प्राथमिकः ग्रन्थः । ग्रन्थोऽयं पञ्चाध्यायात्मकम् । आन्विक्षिकी, वादविद्या, प्रमाणशास्त्रम् इत्यादिक्षिः नामभिः विख्यातस्य अस्य दर्शनस्य कृते गौतमाचार्यस्य पश्चात्कालिकैः आचार्यैः आधिकारिकता आधारशिला च दत्ता । वात्स्यायनाचार्येण रचितं भाष्यं, उद्योतकरस्य वार्तिकम्, वाचस्पतिमिश्रस्य न्यायवार्तिकतात्पर्यटीका, उदयनाचार्यस्य तात्पर्यटीका-परिशुद्धिः, जयन्तभट्टस्य न्यायमञ्जरी इत्यादीनि न्यायसूत्रस्य व्याख्यानानि भवन्ति ।

'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजाति निग्रहस्थानानां तत्वज्ञानात् निःश्रेयसाधिगमः'[7] इति सूत्रेण न्यायसूत्रग्रन्थः आरभ्यते ।

**वैशेषिकदर्शनम्**

कणान् अथवा परमाणून् अधिकृत्य प्रथमतया लोकाय ज्ञानं दत्तवान् कणादमहर्षिः भवति वैशेषिकदर्शनस्य उपज्ञाता । अस्य दर्शनस्य प्रामाणिकग्रन्थः भवति वैशेषिकदर्शनस्य उपज्ञाता । अस्य दर्शनस्य प्रामाणिकग्रन्थः भवति कणादस्य वैशेषिकसूत्रम् । अत्र वैशेषिकसूत्रे षट् पदार्थान् अधिकृत्य प्रतिपादयते । एभिः षट्भिः पदार्थैः सह 'अभावः' इति सप्तमः पदार्थः अनन्तरकाले सङ्कलितः अभवत् । न्यायसूत्रे प्रतिपाद्यमानान् षोडशपदार्थान् वैशेषिके प्रतिपाद्यमानेषु सप्तमपदार्थेषु अन्तर्भावयित्वा न्यायवैशेषिकस्य समन्वयः कृतः अस्ति ।

वैशेषिकदर्शनं पदार्थनिरूपणस्य प्राधान्यं कल्पते । न्यायशास्त्रं तु प्रमाणानां प्राधान्यं कल्पते । एतयोः दर्शनयोः परस्परसमन्वयः प्रपञ्चयाथार्थ्यं व्यक्ततया अवगन्तुं नितरां प्रयोजनप्रदोऽभवत् ।

ज्ञानस्य विषयी - विषययोः मिथः बन्धं अपग्रथनात्मरीत्या, युक्तिपररीत्या, विमर्शनपररीत्या च निरीक्ष्य प्रमाणनियमानां सहाय्येन जीवितप्रश्नानां परिहाराय परिश्रमं करोति न्यायशास्त्रम् । वस्तुनिष्ठानां याथार्थ्यानां गुणान्, तेषां सविशेषताः च अधिकृत्य विशकलनं कृत्वा, याथार्थ्यस्य विविधानां भागानां अवगमनाय स्वीकर्तव्यानां मार्गणामपि न्यायदर्शनं प्राधान्यं कल्पयति । मङ्गलवादः, ईश्वरवादः, प्रामाण्यवादः, कार्यकारणभावः इत्यादयः न्यायदर्शने मुख्यसिद्धान्ताः भवन्ति ।

**भारतीय दर्शनेषु कार्यकारणभावं अधिकृत्य प्रधान सिद्धान्ताः ।**

कारणेन कार्यस्योत्पत्तिः भवति । कार्यस्य उत्पत्ति कारणमन्तरा नैव सम्भवति । यतः लोके कार्यकारणयोः विना अभावसम्बन्धः अवलोक्यते । कार्यकारणभावं अधिकृत्य भारतीयदर्शनेषु प्रधान सिद्धान्ताः सन्ति । बौद्धनये अभावात् भावस्य उत्पत्तिः भवति । यथा बीजस्य नाशे सति अङ्कुरस्य उत्पत्तिः इति ।

सांख्यसिद्धान्तानुसारं कार्यं कारणं च समानरीत्या यथार्थं, युगपदेव वर्तते च । किन्तु कार्यं काचित् नूतनसृष्टिः न भवन्ति च । कार्यं उपादानकारणे अन्तर्लीनं भवत्येव । अनेन कारणेन एव सांख्यसिद्धान्तः सत्कार्यवादः इति नाम्ना अभिज्ञायत् । उत्पत्तेः प्राक् कारणे कपाले घटस्य विद्यामानता इति सांख्याः सत्कार्यवादः । यदि कार्यं तस्य समुद्भवात्

पूर्वमेव उपादानकारणे न वर्तते चेत् केनापि । कथमपि तत् निर्मातुं न शक्यते । घटस्य निर्माणाय कुलालः, इतराणि बहूनि उपकारणानि च आवश्यकानि भवन्ति । तथापि घटः मृत्तिकायां अन्तर्लीनः भवति । कार्यं उपादानकारणे सूक्ष्मरूपेण वर्तते । उपादानकारणं तस्य कार्यं च मिथः नियतरूपेण सम्बद्धः भवति । उपादानकारणेन केवलं स्वस्मिन् अन्तर्लीनं कार्यमेव उत्पादयितुं शक्यते । उपादानकारणेन न सम्बद्धं किञ्चित् कार्यं उत्पादयितुं न शक्यते । कानिचन कार्याणि, नियतकारणेभ्यः एव उत्पाद्यान्ते । वस्त्रं तन्तुभ्यः एव जायते । अस्माभिः उद्दिष्टं कार्यं उत्पादयितुं तदर्थं पर्याप्तं कारणं आवश्यकं भवति । एतत् कार्यं कारणे शक्तिरूपेण वर्तते इत्यस्य निदर्शनं भवति । यदि कार्यं कारणे न वर्तते तर्हि तस्य आविर्भावे पूर्वं असदवस्थायां स्थितं वस्तु संजातं इति वक्तव्यं भविष्यति । तादृशी वक्तव्यता नूनं अनुचिता इति सांख्याचार्याणां अभिप्रायः । कार्यं उपादानकारणात् अभिन्नमेव । यत्र कारणं अस्ति तत्र कार्यमपि भवति । यथार्थतः कार्यं कारणं च एकस्यैव वस्तुनः व्यक्तं अव्यक्तं चेति अवस्थाद्वयमेव केवलं भवति ।

वेदान्तप्रस्थाने अर्थात् अद्वैतनये इदं ब्रह्मविवर्त एव अत एव अद्वैतवैदान्तिनः विवर्तवादिनः । अद्वैतसिद्धान्तानुसारं ब्रह्मैव सर्वेषां मूलं भवति । घटः तस्य उपादानकारणं च व्यावहारिकलोके अन्तर्भवति इति कारणात् तत् द्वयमपि अयथार्थं भवति । अत एव घटस्य तदुपादानकारणस्य च ब्रह्मणा यथार्थबन्धः नास्ति ।

सांख्यदार्शनिकाः, वेदान्तदार्शनिकाः च नैयायिकैः उक्तं समवायिकारणं, असमवायिकारणं च उपादानकारणे अन्तर्भूतं कुर्वन्ति । कार्यस्य घटकरूपेण स्थीयन्ते कारणं तस्य सविशेषताः च । कार्योत्पत्यर्थं उपादानकारणे प्रवर्तमानाति इतराणि कारणानि सर्वाण्यपि निमित्तकारणानि इति तैः मन्यन्ते । वेदान्तप्रस्थाने ब्रह्म जगतोऽभिन्ननिमित्तोपादानं भवति । अर्थात् तेषां नये ब्रह्म जगतः उपादानकारणं निमित्तकारणं च भवति ।

**न्यायवैशेषिकदर्शने कार्यकारणभावः ।**

नैयायिकाचार्याणां अभिप्राये कार्यं कारणं च द्वयमपि यथार्थमेव । कार्यं तु तस्य उत्पादनात् पूर्वं अल्पमपि न भवति । एवं कारणतामधिकृत्य नैयायिकानां अयं सिद्धान्तः आरम्भवादः अथवा असत्कार्यवादः इत्युच्यते । लोके कार्यवस्तूनि सर्वाणि नूतनरूपेण संजायमानाः भवन्ति इत्येव नैयायिकानां अभिप्रायः । पूर्वं न संभूतं कार्यं पश्चात् कारणवस्तूनां व्यापारत्वात् संजायते इति होतोः कारणता 'असत्कार्यवादः' इति व्यपदिश्यते । किन्तु कारणं विना कार्यं सञ्जायेत इति अर्थः अत्र न भवति ।

अन्नंभट्टः स्वस्य ग्रन्थे तर्कसंग्रहे कारणान् त्रिधा विभज्य प्रतिपादयति । समवायिकारणम्, असमवायिकारणम्, निमित्तकारणम् च भवन्ति त्रीणि कारणानि । यत् कार्यं सृजति तत् कारणं भवति । 'कार्यनियतिपूर्ववृत्तिकारणम्' ।[9] कस्यचित् कार्यस्य उत्पत्तये, तस्य कार्यस्य उत्पत्तेः पूर्वमेव निश्चयेन भवितव्यं यत् तदेव तस्य कार्यस्य कारणं भवति । वस्तुतः कार्योत्पत्तेः आवश्यकानि घटकानि एव कारणम् इति वक्तुं शक्नुमः । कार्यस्य उत्पत्तेः पूर्वमेव स्थीयमानं, किन्तु कार्योत्पत्तेः न अत्यन्तापेक्षितानि च वस्तूनि अन्यथासिद्धानि इति उच्यन्ते । घटरूपकार्थे कुलालपिता, दण्डस्य वर्णः इत्यादिभिः अन्यथासिद्धानां कारणानां उदाहरणतत्वेन वक्तुं शक्नुमः । उपर्युक्तानां अन्यथासिद्धानां घटस्य निर्माणे कारणत्वं न अस्ति इति वक्तुं शक्नुमः ।

एवं सति कार्योत्पत्तेः पूर्वं स्थीयमानं भवति कारणं इति उच्यते चेत् अन्यथासिद्धेषु अपि कारणलक्षणं भविष्यति । अतः अन्यथासिद्धेषु अतिव्याप्तिं निवारयितुं मुक्तावलीकारः कार्यलक्षणं स्पष्टतया एवं वदति । अन्यथासिद्धेभ्यः ऋते कार्यस्य उत्पत्तेः पूर्वं क्षणकाले एव निश्चयरूपेण भवितव्यं घटकं भवति कारणम् ।

"अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता ।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् । ।
समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहेतुत्वम् ।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमितहेतुत्वम् ।।"[10]

साधारणतया जन्यं सर्वं कार्यमिति व्यवह्रियते । तेषां जननसामर्थ्यादेव कारणमिति व्यपदिश्यते । "कार्योत्पादकत्वं कारणत्वम्" ।।[11] तर्कभाषायां केशवमिश्रः तु यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत् कारणमिति अभिहितम् । पूर्ववृत्तित्वं चाव्यवहितपूर्ववृत्तित्वं विवक्षितम् । नियतत्वञ्चव्यापकत्वम् । यथा यत्र यत्र घटोत्पत्तिस्तत्र तत्र दण्ड इति व्याप्तौ दण्डस्य व्यापकत्वम् । एवञ्च दण्डस्य कारणत्वम् ।

कारणादेव कार्यस्य उत्पत्तिः । उत्पन्नम्, जन्यम् इत्यादीनि कार्यस्य विशेषणानि सन्ति । प्रागभावे यत् प्रतियोगीभावेन स्थीयत् तदेव कार्यं भवति । यस्य कार्यस्य उत्पत्तेः पूर्वं तस्य कार्यस्य उत्पत्तेः पूर्वं तस्य कार्यस्य अभावः एव प्रागभावः । अतः प्रागभावस्य प्रतियोगी भवति कार्यम् ।

कार्यम् प्रागभावप्रतियोगी । [12]

कार्यम् तस्य समवायिकारणे वर्तते, यथा वयं किञ्चित् वस्त्रखण्डं वयति चेत् तत्र संयोज्यमानानां तन्तूनां सम्भवः भवति, तदुपरि नूतनं वस्त्रं च संजायते च । तन्तुषु समवायसम्बन्धेन नूतनं कार्यं प्रादुर्भवति च । यत्र यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । [13] यस्यात् अपृथकत्वेन कार्यं संजायते तदेव तस्य कार्यस्य समवायिकरणं भवति । कारणवस्तुनी, कार्यवस्तूनि च सामान्यरूपेण वर्तमानं घटकं भवति समवायिकारणम् । तन्तूनि पटस्य समवायिकारणं भवति । पटस्य तन्तुभिः समवायिबन्धोऽस्ति । तथैव पटः तस्य वर्णस्य समवायिकारणं भवति । वस्त्रं तन्तुनि समवेतं भवति । एवं वस्त्रस्य वर्णः पटे समवेतः भवति । एवं वस्त्रस्य वर्णः पटे समवेतः भवति । समवायिकारणं सदा द्रव्यपदार्थ एव भवति ।

समवायिकारणे स्थित्वा कार्यं उत्पादयितुं समर्थं कारणं भवति असमवायिकारणम् । यथा तन्तुरूपं पटरूपं प्रति "कार्येण कारणेन वा सहैकस्मिन्वर्थं समवेतं सत् कारणमसमवायिकारणम्"[14] इति अन्नम्भट्टाः। तत्रासन्नं जनकं द्वितीयमिति[15] इति कारिकावलीकारः । मुक्तावलीकारः विश्वनाथेन समवायिकारणे आसन्नं प्रत्यासन्नं कारणं द्वितीयसमवायिकारणम्[16] । वस्त्रस्य समवायिकारणरूपेषु तन्तुषु स्थित्वा पटं उत्पादयितुं समर्थं इति कारणादेव तन्तूनां संयोगः पटस्य असमवायिकारणत्वेन स्वीकृतः पटस्य वर्णं प्रति चिन्तयति चेत् तन्तुषु स्थितः वर्णः असमवायिकारणम् भवति । गुणः, कर्म वा असमवायिकारणं भवितुमर्हति । वस्तुतः कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतत्वे सति आत्मविशेषगुणभिन्नत्वे सति यत् कारणं तत् असमवायिकारणं इति ।

निमित्तकारणे समवायिकारणात्, असमवायिकारणात् च विभिन्नाति सर्वाणि कारणानि अन्तर्भवति । निमित्तकारणस्य विभागद्वयमस्ति । सामान्यं, विशेषं च । सामान्यं तु अष्टविधमस्ति । तानि ईश्वरः, ज्ञानम्, इच्छा, कर्म, दिक्, कालः, धर्मः, अधर्मः इत्येतानि भवन्ति । विशेषनिमित्तकारणानि तु असंख्यानि भवन्ति । तन्तुवायः वस्त्रसम्बन्धीनि विशेषनिमित्तकारणानि भवन्ति । निमित्तकारणं द्रव्यं वा गुणो वा कर्म वा भवितुमर्हति ।

**उपसंहारः**

कार्यकारणभावमधिकृत्य प्रतिपादितेषु सिद्धान्तेषु नैयायिकस्य आरम्भवादः (असत्कार्यवादः) एव अधिकारिकतया स्वीकार्यः इति वक्तुं शक्नुमः । असत्कार्यवादमनुसृत्य नूतनतया समुद्भूतानि सर्वाणि वस्तूनि अनित्यानि एव । कथमिति चेत् असत् कार्यवस्तु संजायते, किञ्च जातं वस्तु अद्य वा अद्य श्वो वा नश्यति चेति भवति अस्यार्थः । कारणं तु नूतनान् गुणान्, नूतनानि रूपाणि नूतनान् व्यापारान् च संजनयति ।


1. न्या. भा.2.2.2 पृ.सं. 8
2. अमरकोशं - श्लोकं, P. 58
3. याज्ञ. सृ. - श्लोकं, 6
4. न्याय वा. भूमिका - P. 26
5. पद्मपुराणम् - उत्तरकाण्डम् 266, अध्यायः - श्लोकं - 45
6. न्या. भा - 9
7. न्या. सू - 2.2.2
8. तर्कसंग्रहः - P. 72
9. तर्कसंग्रहः, P. 69
10. न्यायसिद्धान्तमुक्तावली - पृ. 78
11. सप्तपदार्थी, पृ. 279
12. तर्कसंग्रहम् - पृ. 21
13. तर्कसंग्रहम् - पृ. 72
14. तर्कसंग्रहम् - पृ. 48
15. कारिकावली - 28
16. न्या. सि. मु. पृ. 10

**सहायकग्रन्थाः**


1. अन्नंभट्टः, तर्कसंग्रहः, सम्पा. नारायणचन्द्रगोस्वामी, संस्कृतपुस्तकभण्डारः, कोलकत्ता ।
2. न्यायसिद्धान्तमुक्तावली, विश्वनाथपञ्चाननः, मुन्षिराम् मनोहरलाल्, न्यूदिल्ली 1948.
3. श्रीमदन्नंभट्टविरचितः - दीपिका - इन्दुमति संस्कृत - हिन्दी व्याख्योपेत - पण्डित रामचन्द्रझा व्याकरणाचार्यः चौखम्बा संस्कृत सीरीज आफिस. वारणसी - 2003.
4. तर्कसंग्रहदीपिका, सम्पा. डा. टि. आर्यादेवी, केरल साहित्य अक्कादमी - 2009.
5. न्यायसिद्धान्तकैरली, अजिमोन्, सि. एस्. रत्ना प्रिन्टेरस् - 2009.